# ॥ मानसोल्लासिनी ॥

प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा इति भट्टतौतस्य वचनम्। प्रतिभा खलु गीतवाद्येषु काव्येषु मौलिकतया सरसतया भाति। नापि शास्त्रेषु परिश्रमः सर्वैः क्रियते। किन्तु काव्यैः सन्मार्गगमनं जगति भूय एव दर्शनगम्यं भवति। तस्मात् खलु महाभारतादिप्रणयनं पुरा कविभिः कृतम्।

अधुना सर्वत्र प्रायः विद्यालयेषु महाविद्यालयेषु विश्वविद्यालयेषु छात्राणां प्रतिभास्फूर्तिः तत्तत्प्रतिष्ठानानां पत्रिकासु सांस्कृतिकानुष्ठानादिषु भवति। अस्माकं विश्वविद्यालयस्य संस्कृतविभागस्य प्रतिभाविकासनस्य काचन विशिष्टा प्रचेष्टा मानसोल्लासिनी इति सभा।

विद्यार्थिनां शास्त्रीयप्रज्ञावैशद्याय गीर्वाणवाणीभाषितप्रावीण्याय विश्वविद्यालयीयाचार्यसनाथितानां छात्राणामियं परिषत्। छात्राणां संस्कृतभाषायां दाक्ष्यकारणात् परिषदा आयोज्यमानानि अनुष्ठानानि संस्कृतभाषैकालम्बनानि।

प्रत्येकस्मिन् शनिवासरे सार्धैकवादनतः पादोनत्रिवादनपर्यन्तमनुष्ठानानि भवन्ति।

२०११तमे वर्षे अस्याः सभाया आरब्धिः। अस्यां स्नातकप्रथमतः स्नातकोत्तरप्रथमवर्षीयाः छात्राः भागिनो भवन्ति। स्नातकोत्तरद्वितीयवर्षीयाः चिताः छात्राः अस्याः परिषदः परिचालका भवन्ति। सर्वे छात्राः गणशः विभक्ता भवन्ति। छात्राणाम् आधिक्ये सति चत्वारो गणा भवन्ति–

क) व्यासगणः
ख) पाणिनिगणः
ग) गौतमगणः
घ) कपिलगणः

छात्रा न्यूना भवन्ति चेत् कपिलगणस्य लोपः भवति।

प्रतिशनिवासरम् एकैको गणः स्वकीयाः प्रतिभाः प्रदर्शयति। तत्र विषयाः प्रायः एवं भवन्ति–

क) गीतम्(तत्र तब्लावादनं वंशीवदनमित्यादिकं भवति मध्ये मध्ये)
ख) नृत्यम्
ग) सिकताचित्राङ्कनम् (sand art)
घ) शास्त्रालोचनम्
ङ) वाक्यार्थः
च) गुरुशिष्यसंवादः
छ) मूकनाटकम्
ज) नाटकम्
झ) योगासनप्रदशनम्
ञ) हास्यकणिकाकथन्

इतोऽपि यदि क्वचित् नवप्रतिभा नयनगोचरा भवति तर्हि तस्या अपि प्रकाशनं भवति।
गणकार्यं विहाय पृथक्तया एवम् अनुष्ठानानि भवन्ति–

क) नाटकस्पर्धा
ख) वेदान्तभाषणस्पर्धा
ग) व्याकरणभाषणस्पर्धा

घ) आधुनिकविषयभाषणस्पर्धा
ङ) सूत्रान्त्याक्षरी स्पर्धा
च) कथालेखनस्पर्धा
छ) अक्षरश्लोकी स्पर्धा
ज) प्रश्नोत्तरी स्पर्धा

शिक्षावर्षस्य अन्त्ये स्पर्धादिषु प्रथमादिस्थानभाजां कृते यथायोग्यं धनं स्थिरीक्रियते परिषदा। तेन धनेन छात्राः स्वेप्सितानि पुस्तकानि स्वीकुर्वन्ति। ततः कस्मिंश्चिद् अनुष्ठाने उपाचार्यस्वामिचरणैः छात्राः पुरस्कृता भवन्ति।

मानसोल्लासिनीयं मनो मोदयन्ती सोल्लासेन लसन्ती अस्ति इति शिवम्॥

# *Mānasollāsinī Pariṣad*

An Educational Institute is best known by the amount of expansion it makes beyond the academic syllabus. RKMV University is yet a toddler dreaming to conquer mountains across the horizon. Once every week, we organize a programme, called *Mānasollāsinī*. It is a platform to explore our performance skills. Students are always eager to perform. The students are divided into four groups, named *Pāniṇi, Goutama, Kapila* and *Vyāsa*. Every group has a leader who guides the team. This is usually a Saturday special programme of one hour duration, 2.30 to 3.30 p.m. Apart from group events, we also have story writing sessions, lectures, debates and *śloka* recitation. The promising students or groups are awarded. This is one big platform to show our own creativity and ingenuity.